| | | | |
|---|---|---|---|
| [1]गूर्वा, | गूर्वणा, | जुगूर्विषा, | जोगूर्वा ; |
| [A]गूर्वणम् , | गूर्वणम् , | जुगूर्विषणम् , | जोगूर्वणम् ; |
| गूर्वित्वा, | गूर्वयित्वा, | जुगूर्विषित्वा, | जोगूर्वित्वा ; |
| प्रगूर्व्य, | प्रगूर्व्य, | प्रजुगूर्विष्य, | प्रजोगूर्व्य ; |
| गूर्वम् २, गूर्वित्वा २, | गूर्वम् २, गूर्वयित्वा २, | जुगूर्विषम् २, जुगूर्विषित्वा २, | जोगूर्वम् २ ; जोगूर्वित्वा २. |

## (417) "गुहू संवरणे" (I-भ्वादिः-896. सक. सेट्. उभ.)

[2]गूहकः-हिका, गूहकः-हिका, [3]जुघुक्षकः-क्षिका, [4]जोगुहकः-हिका ;
[5]गूहिता-त्री, गोढा-ढ्री, गूहयिता-त्री, जुघुक्षिता-त्री, जोगुहिता-त्री ;
गूहन्-न्ती, गूहयन्-न्ती, जुघुक्षन्-न्ती, —
गूहिष्यन्-[6]घोक्ष्यन्-न्ती-ती, गूहयिष्यन्-न्ती-ती, जुघुक्षिष्यन्-न्ती-ती ; —
[B]गूहमानः, गूहयमानः, जुघुक्षमाणः, जोगुह्यमानः ;
गूहिष्यमाणः-घोक्ष्यमाणः, गूहयिष्यमाणः, जुघुक्षिष्यमाणः, जोगुहिष्यमाणः ;
[7]सङ्घुट्-सङ्घुड्-संगुहौ-संगुहः ; — — —

---

1. 'गुरोश्च हलः' (3-3-103) इति अकारप्रत्ययः ।
2. 'ऊदुपधाया गोहः' (6-4-89) इति गुणहेतावजादौ प्रत्यये परतः सर्वत्र उपधाया ऊकारो भवति । एवं ण्यन्तेऽपि ।
3. 'सनि ग्रहगुहोश्च' (7-2-12) इति इण्णिषेधः । 'हलन्ताच्च' (1-2-10) इति सनः कित्वम्, ढत्वम्, भष्भावश्च । 'षढोः कः सि' (8-2-41) इति कत्वम् । एवं सन्नन्ते सर्वत्र बोध्यम् ।
4. यङन्ते द्वित्वे, अभ्यासस्य गुणे, यङवयवस्याकारस्यातोलोपे, 'यस्य हलः' (6-4-49) इति लोपे च रूपम् । अल्लोपस्य स्थानिवद्भावाद्यङन्ते लघूपधगुणः सर्वत्र न ।
5. 'स्वरतिसूतिसूयतिधूञूदितो वा' (7-2-44) इति इड्विकल्पः । इडभावपक्षे, लघूपधगुणे, ढत्व-धत्व-ष्टुत्व-ढलोपदीर्घाः ।
6. इडभावपक्षे-गुणे-ढत्व-भष्भाव-कत्वेषु रूपम् ।
7. ढत्वे पदान्तनिमित्तकः भष्भावः । जश्त्वे चर्त्वविकल्पः ।

A. 'प्रक्ष्यूतगोपीशुचमूर्णपूतनं तूर्णानिसं थूर्णबकादिदानवम् ।
दुर्दूर्विषून् धूर्वितुमेव गूर्वणं मूर्वन्तमापूर्वितपर्वताध्वरम् ॥' धा. का. 1-73.

B. 'गूहमानः स्वमाहात्म्यमटित्वा मन्त्रिसंसदः ।
नृभ्योऽपवदमानस्य रावणस्य गृहं ययौ ॥' भ. का. 8. 45.